International Journal of Sanskrit Research 2018; 4(5): 64-65

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 64-65
© 2018 IJSR
www.anantaajournal.com
Received: 21-07-2018
Accepted: 22-08-2018

**Udaya Kumar Nayak**
Research Scholar,
P.G. Dept. of Sanskrit
Utkal University, Vani Vihar
Bhubaneswar, Odisha, India

**Correspondence**
**Udaya Kumar Nayak**
Research Scholar,
P.G. Dept. of Sanskrit
Utkal University, Vani Vihar
Bhubaneswar, Odisha, India

# संस्कृतमातृकावैभवे उत्कलीयवैयाकरणलक्ष्मीधरोद्गातुः कृतिः

**Udaya Kumar Nayak**

**उपक्रमः**

संस्कृतभाषायाः व्याकरणशास्त्रं प्रति उत्कलीय-संस्कृत-विदुषाम् अवदानं महनीयम् अतुलनीयं च वर्त्तते। तेषु कतिपयानां विदुषां नामानि लोकलोचनस्यान्तराले तिष्ठन्त्यैव यदि च तेषां विद्वद्वर्याणामनन्या कृतिः अद्यापि वर्त्तते। एवंभूतेषु विद्वद्वर्येषु पुरुषोत्तमपुरीक्षेत्रान्तर्गत-गङ्गानारायणपुरवास्तव्यः लक्ष्मीधरः उद्गाता षोडशशतब्द्याः वैयाकरणः आसीत् यस्तु 'नामनिर्मलदर्पण': इति संस्कृत-व्याकरणग्रन्थस्य प्रणेता। ग्रन्थोऽयं प्रक्रियाकौमुदीति प्रक्रियाग्रन्थस्य व्याख्याग्रन्थः एव। व्याख्याग्रन्थोऽयं पूर्वव्याख्याकारविठ्ठलाचार्यस्य प्रसादटीकाद्वारा प्रभावितः प्राप्यते। किन्तु विशालः ग्रन्थोऽयमद्यावधि अप्रकाशितो वर्त्तते। संस्कृतस्य बहूनि अमूल्यग्रन्थरत्नानि अद्यावधि अप्रकाशितानि विविध - ग्रन्थालयेषु संग्रहालयेषु च जीर्णशीर्णपाण्डुलिपिषु निगूढानि सन्ति। लक्ष्मीधरोद्गातुः नामनिर्मलदर्पणाख्यः व्याकरणग्रन्थोऽपि तादृश्या स्थित्या संन्निवद्धो वर्त्तते।

**ग्रन्थकर्त्तुः परिचय**

नास्त्यत्र सन्देहः यत् नामनिर्मलदर्पणस्य ग्रन्थकारः लक्ष्मीधरः उद्गाता उत्कलीयोऽस्ति। यतो हि नामनिर्मलदर्पणस्य पाण्डुलिप्याः आदौ तेन स्वस्य जन्मस्थानविषये विलिख्यते एवम् -

> गङ्गानारायणे नाम्नि देशे श्रीपुरुषोत्तमे।
> वेदाङ्गविद्भिर्विप्रैश्च निवासपूरिते पुरे।।१।।
> परंपराक्रमेणैव पितृभ्यः स्वकृतोद्भवैः।
> कुर्वता जातुकर्णस्य गोत्रोत्पन्नेन धीमता।।२।।
> नृसिहोद्गातुः पुत्रेण लक्ष्मीधर-द्विजन्मना।
> क्रियते बालबोधाय नामनिर्मलदर्पणः।।३।।
> नामनिर्मलदर्पण, OSM, Gr.17, Folio-1

उत्कलविश्वविद्यालयस्य शोधप्रकल्पसहायकप्रमुखः दीनवन्धुत्रिपाठिमहाभागः ग्रन्थकर्त्तुः जन्मस्थानं विषये किञ्चिदधिकं तथ्यं प्राप्तुं तज्जन्मस्थानं स्वयमेव परिदृष्टवान्। तस्य परिदर्शनात् एतदेव ज्ञायते यत् पुरी-मण्डलस्य द्वादशकिलोमिटरदूरे अवस्थितात् चन्दनपुरमिति स्थानात् पञ्चकिलोमिटरदूरे गङ्गानारायणपुरमिति ग्रामः वर्त्तते। ग्रामेऽस्मिन् भार्गवी नदी प्रवहति। ग्रामोऽयं द्विधा विभज्यते। नद्याः एकस्मिन् पार्श्वे मिश्रसंप्रदायाः निवसन्ति अन्यस्मिन् पार्श्वे त्रिपाठिसंप्रदायाः निवसन्ति। एतदनुमीयते यद् सः ग्रामः केनचित् गङ्गवंशीयनृपेण प्रतिष्ठापितः। ग्राममन्तरा 'उद्गातापड़िया' इति स्थानमेकं विद्यते। यत्र तु इदानीम् युनियनकार्यालयः प्रतिष्ठापितः। नामनिर्मलदर्पणग्रन्थस्यादौ सूचितोऽस्ति यत् ग्रन्थकर्त्ता जातुकर्णगोत्रीयः एवासीत्। तस्य पितुः नाम आसीत् नृसिंहः उद्गाता। तस्य जन्मस्थानं पुरुषोत्तमक्षेत्रस्य गङ्गानारायणपुरमिति। सः जात्या ब्राह्मणः एवासीत्।

**ग्रन्थपरिचय**

माड्रास-विश्वविद्यालय-पाण्डुलिपिसंग्रहालये (GOML) नामनिर्मलदर्पणस्य त्रिभिः भागैः युक्ता एका कर्गज-पाण्डुलिपिः प्राप्यते यत्र संज्ञातः समासान्तः भवति प्रथमभागः। कृदन्तः द्वितीयः भागः, तिङन्तः अस्ति तृतीयभागः (उत्तरार्द्ध)। तासु काञ्चन

पाण्डुलिपयः स्पष्टाक्षरैः कल्पिताः, प्रायतः त्रुटिविहीनाः सन्ति। किन्तु ओड़िशा-राज्य-संग्रहालये ग्रन्थस्यास्य कतिपयाः पाण्डुलिपयः लभ्यन्ते। ताः ताड़पत्रेण लिपिवद्धाः सन्ति। तत्र प्राप्तासु पाण्डुलिपिषु Gr.9., Gr. 15, Gr.17, Gr. 108 चिह्निताः पाण्डुलिपयः जीर्णाः सन्ति एव। Gr.13., Gr.17 इति पाण्डुलिप्योः आलोच्यविषयाः सन्ति संज्ञा-सन्धि-सुबन्तप्रत्ययादयः Gr.11., Gr.15 पाण्डुलिप्योः स्त्रीप्रत्यय-अव्यय-कारक-समासप्रकरणानि आलोचितानि। Gr.18 तद्धितेन सह सम्बन्धा। Gr.9., Gr.12 च कृदन्तविषयके। अयं तु सूचनायोग्यः यत् प्रक्रियाकौमुद्याः प्रायः सर्वे अध्यायाः लक्ष्मीधरोद्गात्रा ग्रन्थेऽस्मिन् व्यख्याताः सन्ति।

### ग्रन्थस्यास्य पूर्वार्द्धे वर्णिताः विषया

लक्ष्मीधरोद्गातृमहोदयेन विरचितोऽयं नामनिर्मलदर्पणः पण्डितप्रवरस्य रामचन्द्रस्य प्रक्रियाकौमुद्याः व्याख्याग्रन्थोऽस्ति । ग्रन्थेऽस्मिन् विविधशास्त्रीय तथ्यानि विद्यन्ते। नामनिर्मलदर्पणस्य प्रथमार्द्धे संज्ञाप्रकरण - अच्सन्धि - हल्सन्धि - विसर्गसन्धि - स्वादिसन्धि - अजन्तपुंलिङ्ग - अजन्तस्त्रीलिङ्ग - अजन्तनपुंसकलिङ्ग - हलन्तपुंलिङ्ग - हलन्तस्त्रीलिङ्ग - हलन्तनपुंसकलिङ्ग - अव्यय - स्त्रीप्रत्यय - कारक - अव्ययीभाव - तत्पुरुष - बहुब्रीहि - द्वन्द्व - एकशेष - समासान्तप्रकरण - अलुक्समास - समासाश्रयविधिप्रभृतयः विषयाः सम्यक् आलोचिताः वर्त्तन्ते।

### नामनिर्मलदर्पणस्य पूर्वार्द्धस्य शैली

सूचनारूपेण मातृकायाः प्रारम्भिकशैली अधः उपस्थाप्यते ।

श्री गणेशाय नमः
श्रीमद्विट्ठलमानम्य पाणिन्यादिमुनीन् गुरून्।
प्रक्रियाकौमुदीं कुर्मः पाणिनीयानुसारिणीम्।।
गङ्गानारायणे नाम्नि देशे श्री पुरुषोत्तमे।
*　*　*　*
क्रियते बालबोधाय नामनिर्मलदर्पणः।।
(नामनिर्मलदर्पणः, OSM, Gr.17, Folio-I)

''त्रिभिः कुलकं। अथ प्रत्याहार-सूत्राणि। अइउण्। ऋलृक्। एओङ्। ऐऔच् ... हल्। छन्दोवत्सूत्राणि भवन्ति इति न्यायेन अइउण् इत्यादौ सन्धि र्न भवति। एभिरेकचत्वारिशंत्प्रत्याहारसूत्राणां प्रत्याहाराक्षराणि ज्ञेयम्। एतानि चतुर्विधिानि सूत्राणि महेश्वरेण पाणिनये उपदिष्टानि''।

### उपलब्धि

रामचन्द्रस्य प्रक्रियाकौमुद्याः अनेके व्याख्याग्रन्थाः विद्यन्ते। तेषु प्रसिद्धः व्याख्याग्रन्थः भवति विट्ठलाचार्येण विरचितः प्रसादाख्यग्रन्थः। लक्ष्मीधरोद्गात्रा विरचितः नामनिर्मलदर्पणग्रन्थोऽपि प्रक्रियाकौमुद्याः अन्यतमः उपादेयः व्याख्याग्रन्थः इति वक्तुं शक्यते। न केवलं प्रारम्भिकछात्राणामपि च शेमुषीवतां विदुषां कृते ग्रन्थस्यास्य महती आवश्यकता वर्तते। उत्कलप्रान्ते ग्रन्थस्यास्य लोकप्रियता आसीत्। उत्कलानां संगृहीताः मातृकाः एव लोकप्रियतायाः प्रमाणम्। नामनिर्मलदर्पणः इति ग्रन्थः विट्ठलाचार्यविरचितप्रसादग्रन्थस्याधारेण विरचितः। प्रक्रियाकौमुद्याः अन्येषु व्याख्याग्रन्थेषु नामनिर्मलदर्पणः इति व्याख्याग्रन्थः सहजबोध्यः एवास्ति। पाणिनीयसूत्राणि ग्रन्थेऽस्मिन् सम्यग् व्याख्यातानि छात्राणां कृते सुबोध्यानि सुगम्यानि च सन्ति। अप्रकाशितस्य अस्य नामनिर्मलदर्पणस्य संपादनं समीक्षणात्मकमध्ययनञ्च पाठकीयरुचिप्रवृत्तिप्रतोषणे युगपत्क्षमं भवेत्। अध्ययनमिदं संस्कृतव्याकरणं स्वगुणैः समृद्धिं नयेत् शास्त्रविनोदिनां संस्कृतभाषाप्रेमिणां च समादरं प्राप्नुयात्, अस्य तत्त्वनिचयः सर्वत्र प्रसरेत् प्रचरेत् चेति दृढविश्वासः।

### आधारग्रन्थानां सूची

### मूलपाण्डुलिपीनां सूची

| संग्रहालयः | कार्यालयक्रमः | संगृहीताः पाण्डुलिपयः | तत्रत्याः विषयाः |
|---|---|---|---|
| OSM | 3417/ Gr. / 11 | नामनिर्मलदर्पणः (ताड़पत्रमातृका) | अव्यय-स्त्रीप्रत्यय-कारक- समास - समासान्तप्रक्रियाव्याख्या |
| OSM | 3419/ Gr. / 13 | नामनिर्मलदर्पणः (ताड़पत्रमातृका) | प्रत्याहारसूत्राणि, हलन्तपुंलिङ्ग - स्त्रीलिङ्ग -नपुंसकलिङ्गव्याख्या |
| OSM | 3421/ Gr. / 15 | नामनिर्मलदर्पणः (ताड़पत्रमातृका) | अव्ययानि, स्त्रीप्रत्ययाः, कारकाणि, समासान्तप्रक्रियाव्याख्या, तद्धितप्रक्रिया। |
| OSM | 3423/ Gr. / 17 | नामनिर्मलदर्पणः (ताड़पत्रमातृका) | संज्ञा-अच्सन्धि-हल्सन्धि-विसर्गसन्धि-स्वादिसन्धिव्याख्याः। अजन्तपुंलिङ्ग - नपुंसकलिङ्गव्याख्या। |
| OSM | 3425/ Gr. / 59 | नामनिर्मलदर्पणः (ताड़पत्रमातृका) | षट्कारकाणि |
| GOML/MUL | 3355/ NCC SR 1854 | नामनिर्मलदर्पणः (कर्गजमातृका) | पूर्वार्द्धः-संज्ञातः समासान्तप्रकरणं यावत् (प्रथमभागः) |

### समीक्षापरकग्रन्थानां सूची


1. Mishra Nilamani. (Ed.) An Alphabetical Catalogue of Sanskrit Manuscripts, Part-II, In the collection of Orissa State Museum, Bhubaneswar, 1st Edition, 1974.
2. Raja Kunjunni K. New Catalogus Catagorum, Vol. X (Nā-Nvā), Madras University Sanskrit Series - 35, Published by University of Madras, 1978.
3. Veezhinathan N. New Catalogus Catagorum, (Pāiyalacc hināmamālā-Pradyāna), Madras University Sanskrit Series-38, Published by University of Madras, 1988, XII.
4. Tripathy Dinabandhu. Contribution of Orissa to Sanskrit Grammar, Subhadra Publications, 1st edition, 2008.
5. Trivedi Pranashankar, Kamalashankar. (Crit. Ed.) The Prakriyākaumudī of Rāmachandra, Part - I, Published by Paranjpe, V.J., Secretary, BORI, Poona, First edition, 1925.
6. मिश्रः मुरलीधरः (संपादकः), प्रक्रियाकौमुदी (प्रथमो भागः), प्रकाशकः – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणासी, द्वितीयसंस्करणम्, प्रकाशनवर्षम्– २०००.
7. मिश्रः मुरलीधरः (संपादकः), प्रक्रियाकौमुदी (द्वितीयो भागः), प्रकाशकः – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणासी, द्वितीयसंस्करणम्, प्रकाशनवर्षम्– २०००.